"रक्तं कोकनदं पद्मसख्यमन्यदलोहितम् ॥"
इति रत्नमाला ॥ )
सिन्दूरम्। हिङ्गुलम्। इति राजनिर्घण्टः ॥
( अस्य पर्य्यायो यथा,—
"रक्तं मर्कटशीर्षञ्च हिङ्गुलं दरदो रसः ॥"
इति रत्नमाला ॥ )
( रक्तचन्दनभेदः । तत्पर्य्यायो यथा,—
"पतङ्गं रञ्जनं रक्तं पत्राङ्गञ्च कुचन्दनम् ॥"
इति रत्नमाला ॥ )
शरीरस्थसप्तधात्वन्तर्गतधातुविशेषः । तत् पर्य्यायः । रुधिरम् २ असृक् ३ लोहितम् ४ अस्रम् ५ क्षतजम् ६ शोणितम् ७ । इत्यमरः । २ । ६ । ६४ ॥ पलङ्कारम् ८ रोहितम् ९ रञ्जकम् १० । इति शब्दरत्नावली ॥ कीलालम् ११ अङ्गजम् १२ रौधिरम् १३ खजम् १४ । इति जटाधरः ॥ त्वग्जम् १५ शोणम् १६ लोहम् १७ चर्म्मजम् १८ । इति राजनिर्घण्टः ॥ * ॥ अथ रक्तस्य स्वरूपमाह ।
"यदा रसो यकृद्याति तत्र रञ्जकपित्ततः ।
रागं पाकञ्च संप्राप्य स भवेद्रक्तसंज्ञकः ॥
रक्तं सर्व्वशरीरस्थं जीवस्याधार उत्तमः ।
स्निग्धं गुरु चलं स्वादु विदग्धं पित्तवद्भवेत् ॥
जीवस्याधार उत्तम इति । यत आह ।
जीवो वसति सर्व्वस्मिन् देहे तत्र विशेषतः ।
वीर्य्ये रक्ते मले यस्मिन् क्षीणे याति क्षयं क्षणा-
दिति ॥
वीर्य्ये रक्ते मले च शरीरारम्भके । वाग्भटोक्त-परिमाणमिते शुद्धे जीवो वसति न तु दुष्टे प्रवृद्धे रक्तस्रावणोपदेशस्य वैयर्थ्यप्रसङ्गात् । पित्तवद्भवेत् । अम्लं भवेदित्यर्थः ॥ ० ॥ अथ रक्तस्य स्थानमाह ।
यकृत् प्लीहा च रक्तस्य मुख्यं स्थानं तयोः स्थितम् ।
अन्यत्रापि स्थितवतां रक्तानां पोषकं भवेत् ॥"
इति भावप्रकाशः ॥
रक्तदोषनाशकौषधं यथा,—
"ब्रह्मयष्टिफलं पिष्टं वारिणा तनु लेपतः ।
तेन दुष्टं रक्तदोषः प्रणश्यति न संशयः ॥"
इति गारुडे १९२ अध्यायः ॥
("स खल्वाप्यो रसो यकृत्प्लीहानौ प्राप्य रागमुपैति ॥ भवतश्चात्र ।
रञ्जितास्तेजसा त्वापः शरीरस्थेन देहिनाम् ।
अव्यापन्नाः प्रसन्नेन रक्तमित्यभिधीयते ॥
रसादेव स्त्रिया रक्तं रजःसंज्ञं प्रवर्त्तते ।
तद्वर्षाद्द्वादशादूर्द्धं याति पञ्चाशतः क्षयम् ।"
"रसाद्रक्तं ततो मांसम् ॥"
"तत्र फेनिलमरुणं कृष्णं परुषं तनु शीघ्रगमस्कन्दि च वातेन दुष्टम् । नीलं पीतं हरितं श्यावं विस्रमनिष्टं पिपीलिकामक्षिकाणामस्कन्दि च पित्तदुष्टम् । गैरिकोदकप्रतीकाशं स्निग्धं शीतलं बहलं पिच्छिलं चिरस्रावि मांसपेशीप्रभं श्लेष्मदुष्टञ्च । सर्व्वलक्षणसंयुक्तं काञ्जिकाभं विशेषतो दुर्गन्धि च सन्निपातदुष्टम् । पित्तवद्रक्तेनातिकृष्णञ्च । द्विदोषलिङ्गं संसृष्टम् ॥"
"इन्द्रगोपप्रतीकाशमसंहतमविवर्णञ्च प्रकृतिस्थं जानीयात् ॥"
"त्वग्दोषा ग्रन्थयः शोफाः रोगाः शोणितजाश्च ये ।
रक्तमोक्षणशीलानां न भवन्ति कदाचन ॥"
"देहस्य रुधिरं मूलं रुधिरेणैव धार्य्यते ।
तस्माद्यत्नेन संरक्ष्यं रक्तं जीव इति स्थितिः ॥
इति सुश्रुते सूत्रस्थाने चतुर्द्दशेऽध्याये ॥ * ॥
"शीतोष्णस्निग्धरुक्षाद्यैरुपक्रान्ताश्च ये गदाः ।
सम्यक्साध्या न सिद्ध्यन्ति रक्तजांस्तान् विभावयेत् ॥"
अरुणाभं भवेद्वातात् फेनिलं विशदं तनु ।
पित्तात्पीतासितं रक्तं स्त्यायत्यौष्ण्याच्चिरेण च ।
ईषत् पाण्डु कफाद्दुष्टं पिच्छिलं तन्तुमद्घनम् ।
द्विदोषलिङ्गं संसर्गात्त्रिलिङ्गं सान्निपातिकम् ॥"
"नात्युष्णशीतं लघुदीपनीयं
रक्तेऽपनीते हितमन्नपानम् ।
तदा शरीरं ह्यनवस्थितासृ-
गग्निर्विशेषेण च रक्षितव्यः ॥
प्रसन्नवर्णेन्द्रियमिन्द्रियार्थान्
इच्छन्तमव्याहतपक्तिवेगम् ।
सुखान्वितं पुष्टिबलोपपन्नं
विशुद्धरक्तं पुरुषं वदन्ति ॥"
इति चरके सूत्रस्थाने २४ अध्यायः ॥ )
रक्तः, पुं, लोहितवर्णः । इत्यमरः । १ । ५ । १५ ॥ कुसुम्भः । हिज्जलः । इति राजनिर्घण्टः ॥ (बन्धूकः ॥ तत्पर्य्यायो यथा,—
"बन्धूको बन्धुजीवश्च रक्तो माध्याह्निकोऽपि च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )
रक्तः, त्रि, अनुरक्तः । नील्यादिरञ्जितः । लोहितः । इति मेदिनी । ते, ४८ ॥ क्रीड़ारतः । इति धरणिः ॥ * ॥ रक्तवर्णवस्तुनि यथा,—
"शोणानि भौमतीक्ष्णांशुताम्रकुङ्कुमतक्षकाः ।
गुञ्जेन्द्रगोपखद्योतविद्युत्कुञ्जरबिन्दवः ॥
दृगन्ताधरजिह्वाङ्घ्रिमांससिन्दूरधातवः ।
हिङ्गुलं कुक्कुटशिखा तेजः सारसमस्तकम् ॥
माणिक्यं हंसचञ्चुश्च शुकमर्कटयोर्मुखम् ।
चकोरकोकिलपारावतनेत्रनखाश्रयः ॥
कुसुम्भकिंशुकाशोकजवाबन्धूकपाटलाः ।
कमलं दाड़िमीपुष्पं बिम्बकिम्पाकपल्लवौ ॥
ताम्बूलरागो मञ्जिष्ठालक्तकं रक्तचन्दनम् ।
चैता मखक्षतक्षेत्रधर्म्मरौद्ररसादयः ॥" * ॥
रक्तनीलवाचकानि यथा,—
"लोहितनीलौ पुष्करहरिविद्रुमकमलकृष्ण-रत्नानि ।
सिन्दूरभूषणोत्पलधनञ्जयाम्भोजिनीदलानि ॥"
यथा । पुष्करं पद्माकाशयोः । हरिः सूर्य्यकृष्णयोः । विद्रुमः प्रवालविशिष्टवृक्षयोः । कमलं पद्मपानीयामलयोः । कृष्णरत्नं कौस्तुभेन्द्रनीलयोः । सिन्दूरभूषणं सिन्दूरालङ्कारगजयोः । उत्पलमुत्कृष्टमांसेन्दीवरयोः । धनञ्जयोऽग्निपार्थयोः । अम्भोजिनीदलं पद्मपत्रपुटकिन्योः ।
"कमलाधिपपद्मेशौ नागजित्कान्तस्वयम्भूः ।
रत्नाकरवरश्रीकः सदाधिकमलद्युतिः ॥"
कमलाधिपपद्मेशौ सूर्य्यकृष्णौ । नागजित् गरुड़ो नागखड्गौ च । कान्तः कमनीयः कं जलं तस्यान्तश्च । स्वयम्भूः सूर्य्योद्भवो यमश्च ।
"सदा सिन्दूरमुण्डिता कलयन् कमलश्रियम् ।
स्फुटशोभनताम्रश्रीर्व्वराहस्वामिदीधितिः ॥
एवं सुसम्पन्नखप्रख्यः विद्रूरमणिदीधितिः ।
प्रवालप्रबलच्छायः कलभानुमितच्छविः ॥" * ॥
रक्तश्वेतवाचकानि यथा,—
"रक्तश्वेतौ हरिशुचिपुष्करशतपत्रसूर्य्यकान्ताब्जाः ।
नवहंसमहापद्मार्कसोदराः कमलकीलाले ॥"
हरिचन्द्रसूर्य्ययोः । शुचिः श्वेतवैश्वानरयोः । पुष्करं जलपद्मयोः । शतपत्रं हंसपद्मयोः । सूर्य्यकान्तः स्फाटिके सूर्य्यवत्कान्ते च । अब्जः शङ्खाम्बुजयोः । नवहंसः नवहंसे प्रत्यग्रसूर्य्ये च । महापद्मः श्वेतनागे पद्मे च । अर्कः स्फटिकसूर्य्ययोः । कमलं जलाम्बुजयोः । कीलालं जलरक्तयोः ।
"सुहृद्रत्नादिभिर्भानो रत्ननाम्नि रदांशुकैः ।
जलेभ्यो जन्मशोभाभिः सरोजकुमुदारिभिः ॥"
भानोः परस्मात् सुहृद्रत्नादिभिः ॥ * ॥
सितरक्तौ यथा । रविमित्रं चन्द्रः रवितुल्यश्च । भानुरत्नं सूर्य्यकान्तः रविपद्मरागौ च । अग्निरत्नं सूर्य्यकान्तोऽग्निपद्मरागौ च । रदांशुकं दन्तवस्त्रे अधरश्च । जलजशोभा जलजा चासौ शोभा चेति पक्षे पद्मकान्तिः । एवं सरोजारिशोभा सरोजस्यापि शोभा पक्षे सरोजारिश्चन्द्रः । कुमुदारिशोभा कुमुदस्यापि शोभा पक्षे कुमुदारिरादित्यः । इति कविकल्पलतायाम् २ शेषस्तवके उद्दिष्टवर्णनं नाम १ कुसुमम् ॥
रक्तकः, पुं, ( रक्तं रक्तवर्णं कायति प्राप्नोतीति । कै + कः । ) अम्लानवृक्षः । बन्धूकवृक्षः । रक्तवस्त्रम् । अनुरागी । इति मेदिनी । के, १४५ ॥ विनोदी । इति शब्दरत्नावली ॥ रक्तशिग्रुः । रक्तैरण्डः । इति राजनिर्घण्टः ॥ ( अश्वविशेषः । यथा, अश्ववैद्यके । ३ । १०० ।
"पीतको हरितः प्रोक्तः कषायो रक्तकः स्मृतः ।
पक्वतालनिभो वाजी कयाहः परिकीर्त्तितः ॥"
रक्त एव स्वार्थे कन् । लोहितवर्णे, त्रि । यथा, वृहत्संहितायाम् । ८ । ४६ ।
"अलसस्तु जनः प्रमादिसंज्ञे
डमरं रक्तकपुष्पबीजनाशः ॥")
रक्तकन्दः, पुं, (रक्तः रक्तवर्णः कन्दोऽस्य ।) विद्रुमः । इति हेमचन्द्रः । ४ । १३२ ॥ राजपलाण्डुः । रक्तालुः । इति राजनिर्घण्टः ॥